# Rishigautamaproktam Shivarchanaphalopadesham

# ઋષિગૌતમપ્રોક્તં શિવાર્ચનફલોપદેશમ્

## Document Information

Text title : Rishigautamaproktam Shivarchanaphalopadesham

File name : shivArchanaphalopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 23| 128-145||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# ઋષિગૌતમપ્રોક્તં શિવાર્ચનફલોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

અન્યાનુત્પાદયામાસ પ્રથમં પાર્વતીપતિઃ ।
શિવલિઙ્ગે કૃતા પૂજા મોક્ષાય પરિકલ્પતે ॥ ૧૨૮॥

પઞ્ચાક્ષરેણ મન્ત્રેણ શિવલિઙ્ગે શિવાર્ચનમ્ ।
યઃ કરિષ્યતિ યત્નેન સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૨૯॥

રુદ્રમન્ત્રૈરવિચ્છિન્નમભિષેકં મહેશ્વરે ।
યઃ કરિષ્યતિ યત્નેન સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૩૦॥

ચન્દનાગરુકસ્તૂરીકર્પૂરાણિ મહેશ્વરે ।
યઃ પ્રયચ્છતિ યત્નેન સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૩૧॥

કાલાગરુસમુદ્ભૂતં ધૂપ શઙ્કરસન્નિધૌ ।
યઃ પ્રયચ્છતિ યત્નેન સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૩૨॥

દીપાવલીમાજ્યપૂર્ણાં શિવલિઙ્ગસ્ય સન્નિધૌ ।
યઃ પ્રયચ્છતિ યત્નેન સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૩૩॥

ક્ષીરાન્નં ગોઘૃતપ્લુષ્ટં સશર્કરમુમાપતેઃ ॥

યઃ પ્રયચ્છતિ યત્નેન સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૩૪॥

પ્રદક્ષિણનમસ્કારાન્ શિવલિઙ્ગસ્ય સાદરમ્ ।
યઃ કરોતિ પ્રયત્નેન સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૩૫॥

કવલે કવલે ભક્ત્યા મહાદેવાનુકીર્તનમ્ ।
યઃ કરોતિ પ્રયત્નેન સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૩૬॥

ગચ્છંસ્તિષ્ઠઞ્ચ્છયાનો વા મહાદેવાનુકીર્તનમ્ ।
યઃ કરોતિ પ્રયત્નેન સ જીવન્યુક્ત ઉચ્યતે ॥ ૧૩૭॥

ગોક્ષીરેણ મહાદેવં યોઽભિષિઞ્ચતિ સાદરમ્ ।

સ ભુક્ત્વા સકલાન્ભોગાન્ શિવલોકં ગમિષ્યતિ ॥ ૧૩૮॥

શ્વેતાક્ષતૈરપિ સ્વચ્છૈર્યઃ પૂજયતિ શઙ્કરમ્ ।
સ ભુક્ત્વા સકલાન્ભોગાન્ શિવલોકં ગમિષ્યતિ ॥ ૧૩૯॥

તિલાક્ષતૈરપિ સ્વચ્છૈર્યઃ પૂજયતિ શઙ્કરમ્ ।
સ ભુક્ત્વા સકલાન્ભોગાન્ શિવલોકં ગમિષ્યતિ ॥ ૧૪૦॥

ઘૃતાન્નેન ગુડાન્નેન યઃ શિવં પૂજયિષ્યતિ ।
સ ભુક્ત્વા સકલાન્ભોગાન્ શિવલોકં ગમિષ્યતિ ॥ ૧૪૧॥

યો વૈ દુકૂલવસ્ત્રાદ્યૈઃ શમ્ભું તં પૂજયિષ્યતિ ।
સ ભુક્ત્વા સકલાન્ભોગાન્ શિવલોકં ગમિષ્યતિ ॥ ૧૪૨॥

યઃ સુવર્ણેન રત્નૈર્વા શઙ્કરં પૂજયિષ્યતિ ।
સ ભુક્ત્વા સકલાન્ભોગાન્ શિવલોકં ગમિષ્યતિ ॥ ૧૪૩॥

યો મહાદેવભક્તાનાં પરિચર્યાં કરિષ્યતિ ।
સ ભુક્ત્વા સકલાન્ભોગાન્ શિવલોકં ગમિષ્યતિ ॥ ૧૪૪॥

શરણં યાતિ યઃ સામ્બં મનોવાક્કાયકર્મભિઃ ।
સ ભુક્ત્વા સકલાન્ભોગાન્ શિવલોકં ગમિષ્યતિ ॥ ૧૪૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિગૌતમપ્રોક્તં શિવાર્ચનફલોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૩। ૧૨૮-૧૪૫॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 23 . 128-145..

Notes:
Ṛṣi Gautama ઋષિ ગૌતમ delivers Upadeśa ઉપદેશ about Devotion to Śiva શિવ i.e. Śivabhakti શિવભક્તિ, Mahādevānukīrtanam મહાદેવાનુકીર્તનમ્, making various offerings to Śivaliṅga શિવલિઙ્ગ - as alternative means of worshiping Śiva શિવ; and the merits thereof, especially in terms of attaining Jīvanmukti જીવન્મુક્તિ and Śivaloka શિવલોક.

Proofread by Ruma Dewan

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*